# केन्द्रियसंस्कृतविश्वविद्यालयः, नवदेहली

## अद्वैतवेदान्तविद्याशाखा

## शास्त्रिकक्ष्यापाठ्यक्रमः

## DSCC – 1

| कक्ष्या | सत्रार्धः | पत्रसङ्केत: | पाठ्यक्रमविवरणम् | क्रेडिट | यूनिट | होरा |
|---|---|---|---|---|---|---|
| | | | वेदान्तसारः (सदानन्दयोगीन्द्रप्रणीतः) | | | |
| शास्त्रिप्रथमवर्षम् | प्रथमसत्रार्धः | DSCC 1 | 1. वेदान्तशब्दार्थः, अनुबन्धचतुष्टयम्, गुरूपसदनम्, अध्यारोपः, अज्ञानस्य समष्टिव्यष्टिरूपत्वम्, तुरीयचैतन्यम् | 1 | 1 | 16-20 |
| | | | 2. अज्ञानस्य शक्तिद्वयम्, सृष्टिक्रमः, सूक्ष्मशरीरोत्पत्तिः, पञ्चीकरणम्, स्थूलप्रपञ्चोत्पत्तिः, पुत्रादीनाम् आत्मत्वखण्डनम् | 1 | 1 | 16-20 |
| | | | 3. अपवादः, तत्त्वमसिमहावाक्यार्थविचारः, जहदजहल्लक्षणयोः निरासः, भागलक्षणासमर्थनम् | 1 | 1 | 16-20 |
| | | | 4. अहं ब्रह्मास्मीति वाक्यार्थविचारः, श्रुत्यविरोधनिरूपणम्, श्रवणादिसाधननिरूपणम्, यमादिसाधनानि, जीवन्मुक्तलक्षणम् | 1 | 1 | 16-20 |

## पाठ्यक्रमस्य उद्देश्यम्

1. वेदान्तसारस्य कर्तुः सदानन्दयोगीन्द्रस्य च विषये ज्ञानप्राप्तिः ।
2. वेदान्तसारे वर्णितानां वेदान्तविषयाणाम् अवगमः ।
3. अद्वैतवेदान्तशास्त्रे प्रयुक्तानां पारिभाषिकशब्दानां सार्थं ज्ञानसम्पादनम् ।
4. महावाक्यार्थज्ञाने प्रवेशः ।
5. वेदान्तरीत्या योगाङ्गानां परिचयः ।

## पाठ्यक्रमाध्ययने योग्यता

1. अध्येता प्राक्शास्त्री अथवा तत्तुल्यकक्ष्यायाम् उत्तीर्णः स्यात् ।
2. संस्कृतभाषां वक्तुम् अवगन्तुं च समर्थो भवेत् ।
3. देवनागरी-लिपिज्ञानं तथा संस्कृतेन लेखनसामर्थ्यं च भवेत् ।
4. संस्कृतव्याकरणरीत्या सन्धिसमासादीनां सामान्यपरिचयः स्यात् ।
5. वेदान्तविषयाणाम् अवगमने रुचिः स्यात् ।

## पाठ्यक्रमस्य शिक्षणप्रविधिः (बोधनप्रक्रिया)

1. ग्रन्थस्य ग्रन्थकारस्य च स्थूलपरिचयः ।
2. पाठ्यांशस्य शुद्धतया वाचनम् ।
3. अपेक्षानुसारेण सन्धिसमासादिविभागप्रदर्शनम् ।
4. व्याख्यानविधानेन पाठ्यांशस्य अवगमनम् ।
5. दृष्टान्तानुसारेण प्रमेयाणाम् अवगमनम् ।

**सङ्गतिः**

1.अद्वैतवेदान्तशास्त्रे प्रथमतया प्रवेष्टूनां सामान्यविषयज्ञानार्थं अयं ग्रन्थः स्थापितः ।

2.अधिकारी, विषयः, सम्बन्धः, प्रयोजनं, ईश्वरः, जीवः, अविद्या, अध्यारोपः, अपवादः, समष्टि-व्यष्टिः, उपादानकारणं, निमित्रकारणं, पुत्रादीनामात्मत्वखण्डनं, महावाक्यार्थविचारः, स्थूलसूक्ष्मसृष्टिप्रक्रिया, पञ्चीकरणं, भागत्यागलक्षणा, तात्पर्यलिङ्गानि, समाधिः, जीवन्मुक्तिः इत्यादीनां विषयाणां विशेषज्ञानार्थं पाठ्यांशोयं निश्चितः ।

3.अन्तःकरणस्य निर्मलीकरणप्रक्रिया, सृष्टिक्रमः, आवरण-विक्षेपशक्तिद्वयं, तुरीयचैतन्यं इत्यादीनां विषयाणां ज्ञानार्थं पाठ्यांशोयं प्रसक्तः ।

4. इतरदर्शनादपेक्षयालक्षणायाःभेदःतन्निरूपणश्च ।

**फलितांशः**

1. छात्राः वेदान्तस्य सामान्यज्ञानं प्राप्स्यन्ति ।
2. गुरोः समीपं कथं गन्तव्यं तथा गुरुः कथम् उपदिशति इति विषये ज्ञानं भविष्यति ।
3. अनुबन्धचतुष्टयस्य विशेषज्ञानंम्, उपादानंविवर्तःपरिणाम इत्यादीनां स्फुटं ज्ञानंभविष्यति ।
4. अध्यारोप-अपवादयोः बोधः भविष्यति ।
5. अज्ञानस्यउक्तिद्वयम् , तत्कार्यम्,अवस्थात्रयम्, कोशपञ्चकम् इत्यादीनां विषयाणां परिचयं प्राप्स्यन्ति।

**परीक्षाप्रणाली**

1. आन्तरिकमूल्याङ्कनम् – 40 अङ्कानां कृते । सम्बद्धविषयककक्ष्यायाः गतिविधिषु भागग्रहणं, सङ्गोष्ठ्यां विषयोपस्थापनम्, विषयाध्यापकेन आयोजितायां कक्ष्यापरीक्ष्यायां ( Class Test/Unit Test) छात्रोपलब्धिं च मानदण्डत्वेन परिकल्प्य मूल्याङ्कनम् । वाक्यार्थोपस्थापनम् ।
2. सत्रार्धपरीक्षा – 60 अङ्कानां कृते लेखनात्मिका परीक्षा विश्वविद्यालयस्य नीत्यनुसारेण/व्यवस्थानुसारेण आयोजयिष्यते।(---मासे)
3. मौखिकी परीक्षा – छात्रस्य अवगमनक्षमतायाः अध्ययनतत्परतायाः च विषये ज्ञातुं विषयाध्यापकः कक्षायां मौखिकपरीक्षां यथोचितं यथावसरं कर्तुमर्हति ।
4. सङ्गोष्ठी –अधीतविषयोपस्थापनायवाग्ववर्धिनीपरिषदः/तत्सदृशसभायाः आयोजनम् ।
5. नियोजितकार्यम् – विषयाध्यपकेन यथासमयं नियोजितकार्याणि (निबन्धात्मकानि/ क्रियात्मकानि/ सङ्कलनात्मकानि/अनुवादात्मकानि) देयानि ।

**मूल्याङ्कनप्रक्रिया**

16-20 होराणाम् अध्ययन-मूल्याङ्कणादि कालः एक-क्रेडिट समो भवेत्। एकस्मिन् क्रेडिट्मध्ये 25 अङ्का भवेयुः। 16 होराणाम् अध्यापनानन्तरं 17तः 20 होरामध्ये सम्बन्ध अध्यापकः आन्तरिकं मूल्याङ्कनं कुर्यात् । सम्बद्ध-अध्यापकैः कर्तव्ये आन्तरिक-मूल्याङ्कने प्रति क्रेडिट पूर्णाङ्काः 10 भवेयुः । 10 पूर्णांकेषु 5 अङ्कानां मौखिकी परीक्षा भवेत् । मौखिकपरीक्षायां 16 होरासु अध्यापितविषयाधारे प्रति छात्रः 5 मिनटानि यावत् संस्कृतमाध्यमेन व्याख्यानं कुर्यात्। आन्तरिकमूल्याङ्कनस्य शेष 5 अङ्कानां विभाजनम्, परीक्षणं मूल्याङ्कनञ्च अधोलिखितरूपेण सम्बद्ध अध्यापकः कुर्यात् ।

1. सङ्गोष्ठी/ प्रश्नमञ्च = 02 अङ्कौ
2. उपस्थितिः एवं व्यवहारः = 02 अङ्कौ
3. परियोजना वा प्रदत्तकार्यम् = 01 अङ्कौ

----------------------------

योगः = 05 अङ्काः

प्रतिक्रेडिट् अवशिष्टाणां 15 अङ्कानां परीक्षा मूल्याङ्कनञ्च सत्रार्धस्य अन्तिमे परीक्षाविभागद्वारा भवेत् ।

| परीक्षायाः माध्यमम् (भाषा) |
|---|
| संस्कृतम् |

| निर्धारितः पाठ्यग्रन्थः |
|---|

१. **वेदान्तसारः**, श्रीनृसिंहसरस्वतीविरचितया सुबोधिन्या श्रीरामतीर्थविरचितया विद्वन्मनोरञ्जन्या च सहितः, चौखम्बा कृष्णदास अकादमी, वाराणसी।

२. **श्रीसदानन्दरयोगीन्द्रप्रणीतः वेदान्तसारः** (हिन्दीव्याख्यासहितः), आचार्य बदरीनाथशुक्लः (व्याख्याकारः), मोतीलाल बनारसीदास, वाराणसी।

३. **वेदान्तसारः** ('भावबोधिनी' संस्कृत-हिन्दीटीकोपेतः), श्री रामशरण त्रिपाठी शास्त्री (व्याख्याकारः), चौखम्बा विद्या भवन, चौक, बनारस-१

४.**वेदान्तसारः** ('सारबोधिनी''विमला' संस्कृत-हिन्दीव्याख्योपेतः), डॉ गजाननशास्त्री मुसलगाँवकर (व्याख्याकारः), चौखम्बा कृष्णदास अकादमी, वाराणसी।

५. **वेदान्तसारः** (भावबोधिनी- संस्कृतव्याख्योपेतः), श्री रामशरणत्रिपाठी शास्त्री (व्याख्याकारः), चौखम्बा विद्याभवन, वाराणसी।

**सहायकः सन्दर्भग्रन्थः**

१. लघुवासुदेवमननम् (ब्रह्मश्री सुब्रह्मण्यशास्त्रिणा संशोधितम्), श्रीवाणीविलासमुद्रायन्त्रालयः, श्रीरङ्गम्।

२. विवेकचूडामणिः (हिन्दी-अनुवादसहित), गीताप्रेस, गोरखपुर।

३. अपरोक्षानुभूतिः (हिन्दी अनुवादसहित), गीताप्रेस, गोरखपुर ४. वेदान्तसारः, स्वामी निखिलानन्दः (आङ्गलानुवादकः), अद्वैत आश्रमः, कलकात्ता।

**प्रश्नपत्रस्य प्रारूपम्**

1. आन्तरिकमूल्याङ्कनम् – 4 शिक्षणाङ्कानां(Credit) कृते आहत्य 40 अङ्काः। प्रत्येकं शिक्षणाङ्कस्य (Credit) 10 अङ्काः। तद्विभागश्च इत्थम् –
   - मौखिकपरीक्षा (सचित्रध्वनिमुद्रणसहिता) – 5 अङ्काः।
   - सङ्गोष्ठी/स्फूर्तिप्रश्नाः(Quiz) – 2 अङ्कौ।
   - उपस्थितिः - 2 अङ्कौ ।
   - नियोजितकार्यम् – 1 अङ्कः।
2. सत्रार्धपरीक्षायाः प्रश्नपत्रसंरचना – आहत्य 60 अङ्काः ।
   - प्रदत्तेषु त्रयोदशप्रश्नेषु यथेच्छं दश समाधेयाः। (2 अङ्कौ X 10 प्रश्नाः)
   - प्रदत्तेषु षट्सु प्रश्नेषु यथेच्छं चत्वारः समाधेयाः। (5 अङ्काः X 4 प्रश्नाः)
   - प्रदत्तेषु त्रिषु प्रश्नेषु यथेच्छं द्वौ समाधेयौ । (10 अङ्काः X 2 प्रश्नौ)

## केन्द्रियसंस्कृतविश्वविद्यालयः, नवदेहली

## अद्वैतवेदान्तविद्याशाखा

## शास्त्रिकक्ष्यापाठ्यक्रमः

## DSCC – 2

| कक्ष्या | सत्रार्धः | पत्रसङ्केतः | पाठ्यक्रमविवरणम् | क्रेडिट | यूनिट | होरा |
|---|---|---|---|---|---|---|
| | | | **अद्वैतवेदान्तशास्त्रेतिहासः** | | | |
| शास्त्रिप्रथमवर्षम् | प्रथमसत्रार्धः | DSCC - 2 | 5. आचार्यपरम्परा- व्यासः, गौडपादः श्रीशङ्कराचार्यचरितं चत्वारः शिष्याश्च । | 1 | 1 | 16-20 |
| | | | 6. शाङ्करभाष्य-स्तोत्र-प्रकरणग्रन्थानां परिचयः | 1 | 1 | 16-20 |
| | | | 7. वाचस्पतिमिश्रः, प्रकाशात्मयतिः, श्रीहर्षः, चित्सुखाचार्यः, विद्यारण्यः, मधुसूदनसरस्वती, अप्पय्यदीक्षितः च | 1 | 1 | 16-20 |
| | | | 8. न्याय-वैशेषिक-सांख्य-योग-मीमांसा-जैन-बौद्धदर्शनेषु प्रतिपादितानां जीवेश्वरबन्धमोक्षाणां समीक्षणम् । | 1 | 1 | 16-20 |

| पाठ्यक्रमस्य उद्देश्यम् |
| --- |
| 1. अद्वैतवेदान्तस्य आचार्यपरम्परायाः, भगवत्पादशिष्यपरम्परायाश्च बोधनम् ।<br>2. अद्वैतवेदान्तसिद्धान्तप्रतिपादकानां मतभेदानां परिष्काराणां च ज्ञापनम् ।<br>3. अद्वैतवेदान्तस्य प्रकरणग्रन्थानाम्, आचार्यशङ्करप्रणीतस्तोत्राणां च परिचयः ।<br>4. वेदान्तस्य प्रस्थानग्रन्थानां ( श्रुतिप्रस्थानं, स्मृतिप्रस्थानं, सूत्रप्रस्थानं, भामतीप्रस्थानम्, विवरणप्रस्थानम् इत्येतेषां) स्थूलपरिचयप्रदानम् ।<br>5. वेदान्तेतरदर्शनानां प्रधानतत्त्वानां प्राथमिकः अवबोधः। |
| **पाठ्यक्रमम् अध्येतुं योग्यता** |
| 1) अद्वैतवेदान्तविषयिणी जिज्ञासा ।<br>2) भारतीयदर्शनानाम् अध्ययने आसक्तिः ।<br>3) संस्कृतभाषायाः सामान्यज्ञानम् ।<br>4) प्राक्-शास्त्री/तत्समानस्तरीय-परीक्षायाम् उत्तीर्णता । |

| पाठ्यक्रमस्य शिक्षणप्रविधिः (बोधनप्रक्रिया) |
| --- |
| 1) प्रथमं सर्वेषाम् आधारग्रन्थानां-सहायकग्रन्थानां च परिचयानम् ।<br>2) अद्वैतदर्शनस्य विस्तृतज्ञानपुरस्सरं वेदान्तेतरदर्शनानां परिचायनम् ।<br>3) कक्ष्यासु व्याख्यानविधिना प्रत्यक्षपाठनम् । |

4) यथोचितं E-Content द्वारा अपि बोधनम् ।

5) ग्रन्थालये सम्बद्धविषयकग्रन्थानाम् अध्ययनाय प्रेरणा मार्गदर्शनं च।

**सङ्गतिः**

1) अध्येतुम् अभिलषितशास्त्रस्य इतिहासज्ञानं तस्य शास्त्रस्य अध्ययनाय उपकारकं प्रेरकं च भवति । तस्मात् पाठ्यक्रमस्य प्रथमसत्रार्धे एव अस्य विषयस्य बोधनं समुचितं प्रतीयते ।

**फलितांशः**

अस्य पत्रस्य अध्ययनेन छात्रः -

1) अद्वैतवेदान्तस्य इतिहासं वर्णयितुं शक्नोति ।
2) वेदान्तेतरदर्शनानां परिचयं कारयितुं प्रभवति ।
3) भविष्यत्काले अनुसन्धानपद्धतौ इमे विचाराः सहकुर्वन्ति इति दूरदृष्टिं प्राप्नोति।
4) दर्शनक्षेत्रे अद्वैतवेदान्तस्य महत्त्वम् अवगत्य वेदान्तग्रन्थानाम् अध्ययने अभिरुचिं प्राप्नोति ।

| परीक्षाप्रणाली |
|---|
| 1. आन्तरिकमूल्याङ्कनम् – 40 अङ्कानां कृते । सम्बद्धविषयककक्ष्यायाः गतिविधिषु भागग्रहणं, सङ्गोष्ठ्यां विषयोपस्थापनम्, विषयाध्यापकेन आयोजितायां कक्ष्यापरीक्षयायां ( Class Test/Unit Test) छात्रोपलब्धिं च मानदण्डत्वेन परिकल्प्य मूल्याङ्कनम् । |
| 2. सत्रार्धपरीक्षा – 60 अङ्कानां कृते लेखनात्मिका परीक्षा विश्वविद्यालयस्य नीत्यनुसारेण/व्यवस्थानुसारेण आयोजयिष्यते।(---मासे) |
| 3. मौखिकी परीक्षा – छात्रस्य अवगमनक्षमतायाः अध्ययनतत्परतायाः च विषये ज्ञातुं विषयाध्यापकः कक्षायां मौखिकपरीक्षां यथोचितं यथावसरं कर्तुमर्हति । |
| 4. सङ्गोष्ठी –अधीतविषयोपस्थापनायवाग्ववर्धिनीपरिषदः/तत्सदृशसभायाः आयोजनम् । |
| 5. नियोजितकार्यम् – विषयाध्यपकेन यथासमयं नियोजितकार्याणि (निबन्धात्मकानि/ क्रियात्मकानि/ सङ्कलनात्मकानि/अनुवादत्मकानि) देयानि । |

| मूल्याङ्कनप्रक्रिया |
|---|
| 1) आन्तरिकमूल्याङ्कनं सम्बद्धविषयाध्यापकेन अधोनिर्दिष्टप्रकारेण क्रियते - |
| आन्तरिकमूल्याङ्कनप्रक्रिया – 4 शिक्षणाङ्कानां कृते आहत्य 40 अङ्काः। प्रत्येकं शिक्षणाङ्कस्य (Credit) 10 अङ्काः। तद्विभागश्च इत्थम् – |
| • मौखिकपरीक्षा (सचित्रध्वनिमुद्रणसहिता) – 5 अङ्काः। |
| • सङ्गोष्ठी/स्फूर्तिप्रश्नाः(Quiz) – 2 अङ्कौ। |
| • उपस्थितिः - 2 अङ्कौ । |
| • नियोजितकार्यम् – 1 अङ्कः। |

| |
|---|
| 2) सत्रार्धपरीक्षायाः मूल्याङ्कनं विश्वविद्यालयस्य नीत्यनुसारेण/व्यवस्थानुसारेण करिष्यते। |

| परीक्षायाः माध्यमम् (भाषा) |
|---|
| संस्कृतम् । |

| निर्धारितः पाठ्यग्रन्थः |
|---|
| १. अद्वैत वेदांत साहित्य का इतिहास तथा सिद्धांत, प्रो. राममूर्ति शर्मा |
| २. सर्वदर्शनसङ्ग्रहः, (अभ्यङ्ककरवासुदेवशास्त्रिविरचितव्याख्यासहितः), प्राच्यविद्यासंशोधनमन्दिर, पुणे। |
| ३. भारतीय दर्शन, पद्मभूषण आचार्य बलदेव उपाध्याय, शारदा मन्दिर, वाराणसी। |
| ४. संस्कृत-वाङ्मय का बृहद् इतिहास, दशम खण्ड, पद्मभूषण आचार्य बलदेव उपाध्याय (प्रधानसम्पादकः), उत्तरप्रदेश संस्कृत संस्थान लखनऊ। |

| सहायकः सन्दर्भग्रन्थः |
|---|
| १. भारतीय दर्शन की रूपरेखा, प्रो. हरेन्द्र प्रसाद सिन्हा। |
| २. भारतीय दर्शन, डा. शोभा निगम। |
| ३. वेदान्तदर्शन का इतिहास (वेदान्तविषयक बहिरंग परीक्षात्मक मौलिक ग्रन्थ), आचार्य उदयवीर शास्त्री। |
| ४. Vedanta Philosophy, Swami Vivekananda, Advaita Ashrama, Kolkata. |

५. शाङ्करदर्शनमर्मप्रकाशः, पण्डितप्रवरकृष्णजोयिस् (ग्रन्थकारः), राष्ट्रियसंस्कृतविश्वविद्यालयः ,तिरुपतिः ।

**प्रश्नपत्रस्य प्रारूपम्**

1. आन्तरिकमूल्याङ्कनम् – 4 शिक्षणाङ्कानां कृते आहत्य 40 अङ्काः। प्रत्येकं शिक्षणाङ्कस्य (Credit) 10 अङ्काः। तद्विभागश्च इत्थम् –
   - मौखिकपरीक्षा (सचित्रध्वनिमुद्रणसहिता) – 5 अङ्काः।
   - सङ्गोष्ठी/स्फूर्तिप्रश्नाः(Quiz) – 2 अङ्कौ।
   - उपस्थितिः - 2 अङ्कौ ।
   - नियोजितकार्यम् – 1 अङ्कः।
2. सत्रार्धपरीक्षायाः प्रश्नपत्रसंरचना – आहत्य 60 अङ्काः ।
   - प्रदत्तेषु त्रयोदशप्रश्नेषु यथेच्छं दश समाधेयाः। (2 अङ्कौ X 10 प्रश्नाः)
   - प्रदत्तेषु षट्सु प्रश्नेषु यथेच्छं चत्वारः समाधेयाः। (5 अङ्काः X 4 प्रश्नाः)
   - प्रदत्तेषु त्रिषु प्रश्नेषु यथेच्छं द्वौ समाधेयौ । (10 अङ्काः X 2 प्रश्नौ)